[A]पातम्-तः, पायितः, पिपासितः, पापायितः-तवान् ;
[1]पायः, [2]सुपः, पायः, पिपासुः, पापः ;
पातव्यम्, पाययितव्यम्, पिपासितव्यम्, पापायितव्यम् ;
पानीयम्, पायनीयम्, पिपासनीयम्, पापायनीयम् ;
पेयम्, पाय्यम्, पिपास्यम्, पापाय्यम् ;
[3]ईषत्पानःदुष्पानः-सुपानः ; — —
पायमानः, पाय्यमानः, पिपास्यमानः, पापाय्यमानः ;
पायः, पायः, पिपासः, पापायः ;
पातुम्, पाययितुम्, पिपासितुम्, पापायितुम् ;
पातिः, [4]सुपा, पायना, पिपासा, पापाया ;
पानम्, पायनम्, पिपासनम्, पापायनम् ;
पात्वा, पाययित्वा, पिपासित्वा, पापायित्वा ;
प्रपाय, प्रपाय्य, प्रपिपास्य, प्रपापाय्य ;
पायम् २, पात्वा २, } पायम् २, पाययित्वा २, } पिपासम् २, पिपासित्वा २, } पापायम् २ ; पापायित्वा २. }

## (1063) "पैणृ गतिप्रेरणश्लेषणेषु"

(I-भ्वादिः-458. सक. सेट्. पर.)

'पेणृ—' इति क्वचित् पाठः। 'प्रैणृ—' इति मा. धा. वृत्तिसंमतः पाठः।

पैणकः-णिका, पैणकः-णिका, [5]पिपैणिषकः-षिका, [6]पेपैणकः-णिका ;
पैणिता-त्री, पैणयिता-त्री, पिपैणिषिता-त्री, पेपैणिता-त्री ;

---

1. आदन्तलक्षणे णप्रत्यये युगागमे च रूपमेवम्।
2. 'आतश्चोपसर्गे' (3-1-136) इति कर्तरि कप्रत्ययः।
3. ईषदाद्युपपदेषु, 'आतो युच्' (3-3-128) इति खलर्थवादो युच्। अनादेशः।
4. स्त्रियां भावादौ, 'आतश्चोपसर्गे' (3-3-106) इत्यङ्।
5. सन्नन्तात् ण्वुलि, द्वित्वे, अभ्यासे 'ह्रस्वः' (7-4-59) इति ह्रस्वः। स च, 'एच इग् घ्रस्वादेशे' (1-1-48) इति परिभाषया इकाररूप इति ज्ञेयम्।
6. यङन्ताण्ण्वुलि अभ्यासे ह्रस्वे, तस्य 'गुणो यङ्लुकोः' (7-4-82) इति गुणेन पुनरेकारश्रवणमिति ज्ञेयम्।

A. 'अपातमाल्यं शयितं सुवानकाशरविषि स्तातततनौ फणीन्द्रे॥' धा. का. 2-32.